# संस्कृतभाषा – I

Course Code – VK103

Integrated Masters (Advaita Vedanta and Vyakarana)

**Course Category: Core** **Schedule of Offering: 1**

**Course Credit Structure: 3**

- **Lecture: 3**
- **Tutorial: 0**
- **Practical: 0**

**Contact Hours per week: 3**

## 1. Introduction

काव्याध्ययनं सदुपदेशादीनि नानाप्रयोजनानि प्रापयतीति विदितमेव विदाम् । रसानन्दस्तावदस्य परमं प्रयोजनम् । तस्मात् तदिदं बहुमतं वर्तते । अपि च, काव्याध्ययनं भाषाज्ञानस्य द्वारम् । यदि कश्चन काव्यभागः प्रतिपदं प्रकृतिप्रत्ययविवेकेन सन्धिसमासादिचिन्तनेन च सहितम् अधीयेत तर्हि भाषा सम्यग् अधिगता भविष्यति । अत एव **शतश्लोकेन पण्डितः** इत्युक्तिः प्रथतेतमाम् । तस्मात् साम्प्रदायिकाध्ययनपद्धतौ कतिपयानां सत्काव्यानाम् अध्ययनतः पश्चाद् एव शास्त्रे प्रवेशं लभन्ते स्म छात्राः । तदेतन्मनसि निधाय अस्मिन् शास्त्रपाठ्यक्रमे आदौ काव्यभागोऽयं निवेशितोऽस्ति ।

तथा च विद्यार्थिनोऽत्र कालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य द्वितीयं सर्गम् अध्येष्यन्ते । अत्रादौ महाकाव्यलक्षणं कविकाव्यपरिचयः तद्वैशिष्ट्यम् इत्यादीन् मुख्यतमान् कांश्चन अंशान् उपवर्ण्य प्रथमसर्गादिस्थाः दश श्लोकाः पाठयिष्यन्ते, येन अस्यां कृतौ छात्राणां प्रवेशः अनायासलभ्यो भविष्यति । अत्र अध्यापनविधिः संस्कृतमाध्यमेन एव भविष्यति ।

## 2. Course Objectives

अस्य काव्यभागस्य अध्ययनेन छात्राः –

- निर्दिष्टे काव्यभागे सम्यग् ज्ञानं प्राप्स्यन्ति ।
- कालिदासस्य कानिचन वैशिष्ट्यानि वर्णयितुं प्रभविष्यन्ति ।
- प्रकृतिप्रत्ययविवेकः सन्धिसमासादिज्ञानम् – इत्यादिषु भाषाव्युत्पत्तिसम्बद्धेषु विषयेषु प्रवेशं सम्पादयिष्यन्ति ।

- पदानां छेदः, आकाङ्क्षापद्धत्या तेषाम् अन्वयः – इत्यादिकाः अर्थावबोधसहकारिणीः प्रक्रियाः अभ्यस्यन्ति ।
- अन्येषामपि काव्यानाम् अध्ययने प्रेरणां प्राप्स्यन्ति ।

## 3. Pre-requisites

संस्कृतावगमनक्षमता प्रबलाध्ययनेच्छा च अत्रापेक्षिते स्तः । यदि संस्कृतभाषाज्ञानं देवनागरीलिपिपरिचयश्च स्यात् तर्हि उत्तमं भविष्यति ।

## 4. Readings

1. रघुवंशम्, मल्लिनाथकृतसञ्जीविनीटीकया हेमाद्रिवल्लभादिटीकागतविशिष्टांशैश्च समुल्लसितम्, राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली,
2. Raghuvamśa, M. R. Kale, M.L.B.D., Delhi

## 5. Module-wise topics

**Module 1 – अवतरणिका** **07**

Topics –

- ❖ महाकाव्यलक्षणम् 01
- ❖ कालिदासः तत्कृतयश्च 01
- ❖ रघुवंशपरिचयः 01
- ❖ प्रथमसर्गस्य आद्याः दश श्लोकाः 04

Readings -

- ❖ Kāvyādarśa, 1st chapter, Bhandarkar Oriental Research Institute
- ❖ Kālidāsa, K Krishnamoorthy, Sahitya Academy
- ❖ Raghuvamśa of Kālidasa, Introduction, M. R. Kale, M.L.B.D., Delhi
- ❖ रघुवंशमहाकाव्यम्, Introduction, Chaukhambha Sanskrit Prakashan, Varanasi
- ❖ रघुवंशमहाकाव्यम्, (1st canto), Rashtriya Sanskrit Sansthan, New Delhi

**Module 2 – दिलीपकृतं धेनोरनुचरणम् (०१-२५ श्लोकाः)** **12**

Topics –

- ❖ वनं प्रति प्रस्थानम् (01-02) 01
- ❖ दिलीपेन श्रद्धया नन्दिन्याः अनुसरणम् (03-08) 03
- ❖ वने द्रुमादिभिः कृतः राज्ञः उपचारः (09-14) 03
- ❖ सायम् आश्रमं प्रति प्रत्यागमनम् (15-18) 02
- ❖ दम्पतिभ्यां विहिता नन्दिनीसपर्या (19-25) 03

Readings -

- ❖ रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, द्वितीयसर्गे ०१-२५ श्लोकाः

**Module 3 – सिंहेन नन्दिन्याम् आक्रमणं दिलीपं प्रति वचनं च (26-41) 08**

Topics –

| | |
|---|---|
| ❖ सिंहेन नन्दिन्याम् आक्रमणम् (26-27) | 01 |
| ❖ सिंहनिग्रहाय दिलीपस्य यत्नः वैफल्यं च (28-32) | 02 |
| ❖ राजानं प्रति सिंहस्य उक्तयः (33-41) | 05 |

Readings -

- ❖ रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, द्वितीयसर्गे २६-४१ श्लोकाः

**Module 4 – सिंहदिलीपयोः संवादः (42-59) 08**

Topics –

| | |
|---|---|
| ❖ 'गां मुञ्च मां खाद च' इति राज्ञो निवेदनम् (42-45) | 02 |
| ❖ 'इदमयुक्तम्' इति सिंहस्य सयुक्तिकं प्रतिबोधनम् (46-51) | 02 |
| ❖ राज्ञा पुनरपि स्वप्रार्थनायाः समर्थनम् (52-58) | 03 |
| ❖ राज्ञा सिंहाय आहारत्वेन स्वनिवेदनम् (59) | 01 |

Readings -

- ❖ रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, द्वितीयसर्गे ४२-५९ श्लोकाः

**Module 5 – नन्दिन्यनुग्रहः (60-75) 10**

Topics –

| | |
|---|---|
| ❖ दिलीपस्योपरि पुष्पवृष्टिः नन्दिन्याः अनुग्रहवाचश्च (60-63) | 02 |
| ❖ दिलीपेन सन्तानापेक्षाप्रकटनं नन्दिन्याः तदनुग्रहश्च (64-69) | 03 |
| ❖ सपत्नीकस्य राज्ञः स्वपुरीं प्रति गमनम् (70-74) | 02 |
| ❖ सुदक्षिणायाः गर्भधारणम् (75) | 01 |
| ❖ पाठस्य उपसंहारः | 02 |

Readings -

- ❖ रघुवंशमहाकाव्यम्, Rashtriya Sanskrit Sansthan, New Delhi, द्वितीयसर्गे ६०-७५ श्लोकाः

## 6. Pedagogy

अत्र तावद् भाषाव्युत्पत्तिसम्पादनं काव्यस्वारस्यानुसन्धानं च लक्ष्यीकृत्य पाठनं भविष्यति । प्रतिकक्ष्यम् आदौ पूर्वदिने पठिताः विषयाः छात्रैः स्मरणबलेन प्रस्तोतव्याः भविष्यन्ति । छात्राणां हिताय सुखबोधाय च विशिष्टोपन्यासादयः अन्येऽपि अंशाः कदाचित् स्थानं भजेरन् ।

## 7. Evaluation Pattern

अस्मिन् पत्रे मौल्यमापनम् इमान् अंशान् आधारीकरिष्यति -

| | | |
|---|---|---|
| ❖ Class Participation and Presentation | : | 15% |
| ❖ Assignments | : | 20% |
| ❖ Mid-term Examination | : | 25% |
| ❖ End-Term Examination | : | 40% |
| Total | : | 100% |